नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**
No. of Printed Pages – **07**

# SS-12-Sanskrit Sah.

## संस्कृत साहित्यम्

**उच्च माध्यमिक परीक्षा, 2020**

**समय : 3¼ (सपाद होरात्रयम्)**

**पूर्णाङ्क : 80**

परीक्षार्थिभ्यः सामान्य निर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

1. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

माता गुरुतरा भूमेः, खात् पितोच्चतरस्तथा ।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात् ।।

(क) भूमेः गुरुतरा का अस्ति ? (एकपदेन उत्तरम्) **(1)**

(ख) चिन्ता कस्मात् बहुतरी वर्तते ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) गगनात् इत्यस्य पर्यायपदं चित्वा लिखत । **(1)**

(घ) मन्दतरम् इत्यस्य विलोमपदं चित्वा लिखत । **(1)**

2. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

आसीत् पयोधिपर्यन्तपृथ्वीप्रशासकः इक्ष्वाकुवंशोद्भवः लोकललामः दिलीपो नाम भूपतिः, मगधराजपुत्री सुदक्षिणा तस्य सहधर्मचारिणी चासीत् । कुलगुरुवशिष्ठस्य त्रिकालदर्शिनः परामर्शं प्रसादोऽयमिति मत्वा सन्तानहीनो स सम्राट् पुत्रप्राप्तीच्छया कामिन्या सुदक्षिणया सह आत्मानं कामधेनुप्रसूतेः नन्दिन्याः सेवायां नियोजितवान् ।

(क) मगधराजपुत्री का आसीत् ? (एकपदेन उत्तरम्) **(1)**

(ख) वशिष्ठः कस्य कुलगुरुः आसीत् ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'लोकललामः दिलीपः' इत्यत्र विशेषणपदं किम् अस्ति ? **(1)**

(घ) 'समुद्रः' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत । **(1)**

3. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत –

सीता – (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्रः । किं करोमि ? (इति मूर्च्छति)

तमसा – वत्से जानकि ! समाश्वसिहि । विधिस्तवानुकूलो भविष्यति । तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

रामः – अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे ।

सीता – (साक्षेपम्) आर्यपुत्रः कः ?

वासन्ती – परिणीतमपि किम् ?

(क) विधिः कस्याः अनुकूलो भविष्यति ? (एकपदेन उत्तरम्) **(1)**

(ख) 'आर्यपुत्रः' इति शब्दः कस्य कृते प्रयुक्तः ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'गच्छतीदानीमार्यपुत्रः' इत्यत्र गच्छति क्रियायाः कर्ता कः ? **(1)**

(घ) 'आयुष्मतोः कुशलवयोः' इत्यत्र विशेष्यपदं किम् अस्ति ? **(1)**

4. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – **(3 × 1 = 3)**

(क) सर्वः स्वार्थं समीहते ।

(ख) वेदानाम् अन्तिमो भागः वेदान्तः ।

(ग) अमरशक्तेः त्रयः पुत्राः आसन् ।

5. निम्नलिखितवाक्ययोः भावार्थः हिन्दी भाषया संस्कृतेन वा लिखत – **(2 × 2 = 4)**

(क) सह वीर्यं करवावहै ।

(ख) चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशोबलम् ।

6. अधोलिखितस्य श्लोकस्य अन्वयसहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत – **(1½ + 1½ = 3)**

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।

7. निम्नलिखितशब्दयोः हिन्दीभाषायां आङ्लभाषायां वा अर्थं लिखत – **(2)**

(क) समवायः

(ख) भृशम्

8. 'पूज्यमानाः अपि देवताः न ते प्रसीदन्ति ।' इत्यत्र प्रसीदन्ति इति क्रियायाः कर्ता कः अस्ति ? **(1)**

9. 'अपरिणामोपशमो दारुणो लक्ष्मीमदः' इत्यत्र 'दारुणः' इति पदस्य विशेष्यपदं लिखत । **(1)**

10. 'सः तस्य समन्तात् परिभ्रमति ।' इत्यत्र 'सः' सर्वनामस्थाने संज्ञापदस्य प्रयोगं कुरुत । **(1)**

11. "त्वं मां त्यक्त्वा किमर्थम् अत्र आगतवती ?" इति वाक्यं कः कस्मै कथयति ? **(1)**

12. 'भार्या मित्रं गृहे सतः' इत्यत्र रेखाङ्कितपदस्य विलोमपदं लिखत । **(1)**

13. 'मानवाः सर्वत्र विजयं कामयन्ते ।' इत्यत्र कामयन्ते क्रियापदस्य कर्तृपदं लिखत – **(1)**

14. वेदाङ्गानि कति ? कस्यचिदेकस्य संक्षिप्तं परिचयं लिखत । **(1 + 2 = 3)**

15. 'प्रतिज्ञायौगन्धरायणम्' नाटकं केन विरचितम् ? कति अङ्केषु विभक्तमिदं नाटकम् ? **(1 + 1 = 2)**

16. महाकविबाणेन स्वीया आत्मकथा कस्मिन् ग्रन्थे लिखिता ? एषः ग्रन्थः कति उच्छ्वासेषु विभक्तः ? **(1 + 1 = 2)**

17. निम्नलिखितप्रश्नानां संक्षिप्तम् उत्तरं लिखत – **(3 × 1 = 3)**

(क) 'जयपुरविलासः' इति खण्डकाव्यं केन विरचितम् ?

(ख) 'महारथी' इति महाकाव्ये कति सर्गाः सन्ति ?

(ग) 'हरनामामृतम्' महाकाव्यस्य नायकः कः ?

18. अधोलिखितेषु कस्यापि एकस्य छन्दसः लक्षणोदाहरणे लिखत – **(3)**

(क) इन्द्रवज्रा

(ख) मन्दाक्रान्ता

(ग) हरिणी

19. अधोलिखितयोः पद्यांशयोः कस्यचिदेकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत – **(1 + 1 = 2)**

(क) सा निन्दन्ति स्वानि भाग्यानि बाला ।

(ख) त्वमेकं परन्निश्चलं निर्विकारम् ।

20. अधोलिखितेषु कस्यचिदेकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत – **(3)**

(क) यमकम्

(ख) रूपकम्

(ग) निदर्शना

21. अधोलिखितयोः पद्यांशयोः प्रयुक्तस्य कस्यचिदेकस्य अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत – **(1 + 1 = 2)**

(क) हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते ।

(ख) वधाय वध्यस्य शरं शरण्यः ।

22. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

एकः चोरः ऋषेः आश्रमं गतवान् । तत्र ऋषिकुमारः इव व्यवहारं कृतवान् । आचरणे सहजता भवेत् किल ? तदर्थं चोरः प्रातः काले उत्तिष्ठति स्म । शीतलेन नदीजलेन स्नानं करोति स्म । सर्वदा देवध्यानं करोति स्म । पूजनम् अध्ययनम् इत्यादिकम् अपि करोति स्म । एवमेव सप्ताहद्वयम् अतीतम् । चोरस्य मनः इदानीम् ऋषिजीवने आसक्तम् ।

(क) ऋषिकुमारः इव व्यवहारं कः कृतवान् ? (एकपदेन उत्तरम्) **(1)**

(ख) चोरस्य मनः कस्मिन् आसक्तम् ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'शीतलेन नदीजलेन' इत्यत्र विशेष्यपदं किम् ? **(1)**

23. अधोलिखितम् अपठितम् गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानामुत्तराणि लिखत –

कस्मिंश्चित् नगरे सोमिलको नाम तन्तुवायो वसति स्म । सः अत्युत्तमानि वस्त्राणि वयति स्म । अनेकविधाभिः रचनाभिः अलङ्कृतानि राजोचितानि वस्त्राणि एव सः निर्माति स्म । परन्तु एतादृशानां वस्त्राणां निर्माणे कुशलस्यापि तस्य आर्थिकस्थितिः उत्तमा नासीत् । सः यद् अर्जयति तेन तस्य कुटुम्बस्य भोजनस्य वस्त्राणां च निर्वहणं केवलं भवति । ततः किञ्चिदपि अधिकं न अवशिष्यते । परन्तु तस्य नगरस्य अन्ये सामान्याः तन्तुवायाः ये स्थूलवस्त्राणां निर्माणं केवलं जानन्ति ते महद्धनम् अर्जयन्ति स्म । ते च अतीव धनिकाः आसन् । तान् अवलोक्य सः स्वभार्याम् आह – "प्रिये ! पश्यैतान् स्थूलपट्टकारकान् धनकनकसमृद्धान् । तदधारणकं ममैतत् स्थानकम् तदन्यत्रोपार्जनाय गच्छामि ।"

(क) तन्तुवायस्य नाम किम् आसीत् ? (एकपदेन उत्तरम्) **(1)**

(ख) कस्य आर्थिकस्थितिः उत्तमा नासीत् ? (एकपदेन उत्तरम्) **(1)**

(ग) केवलं स्थूलवस्त्राणां निर्माणं के जानन्ति स्म ? (पूर्णवाक्येन उत्तरम्) **(1)**

(घ) 'ते अतीव धनिकाः आसन् ।' इत्यत्र क्रियापदं किम् ? **(1)**

(ङ) 'सः अत्युत्तमानि वस्त्राणि वयति स्म ।' इत्यत्र वस्त्राणि पदस्य विशेषणपदं लिखत । **(1)**

24. प्रदत्तशब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत – **(5)**

भारतीयसंस्कृतिः, धर्मप्राधान्यम्, आध्यात्मिकी भावना,

सदाचारपालनम्, वर्णव्यवस्था, आश्रमव्यवस्था, कर्मवादः

पुनर्जन्म, अहिंसापालनम्, तपोमयं जीवनम् ।

**अथवा**

क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत –

(क) किञ्चित् कालान्तरं शशकः अपि जागरयित्वा तत्र उपागच्छत् ।

(ख) शशकः तीव्रवेगेन धावयित्वा श्रान्तः जातः ।

(ग) 'कच्छपः लक्ष्यं प्राप्तवान्' इति दृष्ट्वा शशकः लज्जितोऽभवत् ।

(घ) कच्छपः मन्दं–मन्दं किन्तु निरन्तरं चलन् लक्ष्यं प्राप्तवान् ।

(ङ) एकदा तयोः मध्ये धावनप्रतिस्पर्धा अभवत् ।

(च) सः एकस्य वृक्षस्य छायायाम् अतिष्ठत् शीघ्रमेव निद्राधीनश्च अभवत् ।

(छ) तस्य वेगः तीव्रः आसीत्, अतः सः गर्वितः अभवत् ।

(ज) शशकः कच्छपस्य उपहासम् अकरोत् ।

(झ) एकस्मिन् वने एकः शशकः आसीत् ।

(ञ) एकदा सः मन्दं–मन्दं गच्छन्तं कच्छपम् अपश्यत् ।

25. अधोलिखितवाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृत भाषायाम् अनुवादं कुरुत – **($5 \times 1 = 5$)**

(क) मैं दूध पीता हूँ ।

(ख) वह मित्रों के साथ उद्यान में खेलता है ।

(ग) सड़क के दोनों ओर वृक्ष हैं ।

(घ) सरोवर में कमल का फूल खिलता है ।

(ङ) बालक घोड़े से गिरता है ।

(च) राजेश महाविद्यालय में पढ़ेगा ।

(छ) वीणा ने कल श्रीमद्भगवद्गीता पढ़ी ।

(ज) आप मुझे पुस्तक दो ।

26. अधोलिखितपदयोः सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत – **(1 + 1 = 2)**

(क) हरये

(ख) विष्णूदयः

27. अधोलिखितपदयोः सूत्रोल्लेखपूर्वकं सन्धिं कुरुत – **(1 + 1 = 2)**

(क) महा + इन्द्रः

(ख) गङ्गा + ओघः

28. निम्नलिखितेषु रेखाङ्कितपदेषु प्रयुक्तविभक्तेः नाम उल्लिख्य विधायकसूत्रं लिखत – **(4 × 1 = 4)**

(क) नृपः सिंहासनम् अध्यास्ते ।

(ख) कामात् क्रोधः जायते ।

(ग) नृपः निर्धनाय धनं यच्छति ।

(घ) गवां गोषु वा कृष्णा बहुक्षीरा ।

29. अधोलिखितपदयोः प्रयुक्तसमासस्य नाम उल्लिख्य विग्रहं कुरुत – **(1 + 1 = 2)**

(क) अधिहरि

(ख) दशाननः

30. अधोलिखितविग्रहवाक्ययोः समासं कृत्वा नामापि लिखत – **(1 + 1 = 2)**

(क) चोरात् भयम्

(ख) हरिश्च हरश्च

---

DO NOT WRITE ANYTHING HERE